# दीपिका

## सप्तमकक्षायै
## संस्कृत–अभ्यासपुस्तिका

7




SCERT
स्वाध्यायान्मा प्रमदः

राज्य शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्
वरुण मार्ग, डिफेन्स कॉलोनी, नई दिल्ली–110024

**ISBN:** 978-93-6291-911-3
©State Council of Educational Research and Training, Delhi
2025
Copies : 895

## अभ्यासपुस्तिकानिर्माणसमितिः

### संरक्षकः

**श्री पांडुरंग के पॉलः (आई.ए.एस.)**
प्रमुखः सचिवः (शिक्षा) अध्यक्षः, राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली
**डॉ. रीता शर्मा**
निदेशिका, राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

### परामर्शदाता

**डॉ. मुकेश यादवः**
सचिवः, राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

### परियोजना समन्वयिका

**डॉ. मनीषा तनेजा**
सहायक-आचार्या (संस्कृतम्), राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

### विशेषज्ञाः

**प्रो. जतीन्द्र-मोहन-मिश्रा**
आचार्यः, संस्कृतम्, भाषा-शिक्षा-विभागः, राष्ट्रिय-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली
**प्रो. लीना सक्करवालः**
आचार्या, शिक्षा-विभागः, केन्द्रीय-संस्कृत-विश्वविद्यालयः, जनकपुरी, दिल्ली
**प्रो. कमला भारद्वाजः**
पूर्व-विभागध्यक्षा, श्रीलालबहादुर-शास्त्री-राष्ट्रिय-संस्कृत-विश्वविद्यालयः, दिल्ली
**डॉ ज्ञानेन्द्र-कुमारः**
सहायक-आचार्यः, केन्द्रीय-शिक्षा-संस्थान, दिल्ली-विश्वविद्यालयः

**Published by**: State Council of Educational Research and Training, Delhi- 110024.
**मुद्रकः ऐजुकेशनल स्टोर्स, गाजियाबाद-201009 (उ.प्र.)**

**डॉ वाचस्पतिनाथझामणि**
सहायक-आचार्य:, संस्कृतम्, भाषा-शिक्षा-विभाग:, राष्ट्रिय-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

**डॉ. मनीषा तनेजा**
सहायक-आचार्या (संस्कृतम्), राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

**डॉ आभा झा**
प्रवक्त्री-संस्कृतम्, गार्गी-सर्वोदय-कन्या-विद्यालय:, ग्रीन पार्क:, दिल्ली -16

**डॉ० अनिल-कुमार:**
प्रवक्ता-संस्कृतम्, रा० व० मा० बाल-विद्यालय:, टीकरी कलां, दिल्ली।

**श्री रोशनलाल:**
प्रवक्ता-संस्कृतम्, रा० व० मा० बाल-विद्यालय:, सु०पुरी मार्ग:,नांगलोई, दिल्ली।

## लेखक-मण्डलम्

**डॉ. मनीषा तनेजा-** सहायक-आचार्या (संस्कृतम्), राज्य-शैक्षिक-अनुसन्धान-प्रशिक्षण-परिषद् देहली

**डॉ. आभा झा-**प्रवक्त्री (संस्कृतम्), गार्गी-सर्वोदय-कन्या विद्यालय:, ग्रीनपार्क:, देहली-16

**डॉ. अनिल-कुमार:-** प्रवक्ता (संस्कृतम्), राजकीय-वरिष्ठ-माध्यमिक-बाल-विद्यालय:, टीकरी कलाँ देहली-41

**श्री रोशनलाल:-** प्रवक्ता (संस्कृतम्), राजकीय-वरिष्ठ -माध्यमिक-बाल-विद्यालय: एस पी. रोड नांगलोई, देहली

**श्री रमेशचन्द्र: बुनकर:-** प्रवक्ता (संस्कृतम्), सर्वोदय-बाल-विद्यालय:, न०-2 पालम एंक्लेव, देहली-45

**श्री अभिनन्दन: झा-** प्रशिक्षित-स्नातक-शिक्षक:, (संस्कृतम्), कौटिल्य-सर्वोदय सहशिक्षा विद्यालय:, चिराग एन्क्लेव, नवदेहली-48

**डॉ. मनीषकुमार: त्रिपाठी-** प्रशिक्षित स्नातक शिक्षक:, (संस्कृतम्), राजकीय-वरिष्ठ-माध्यमिक-बाल-विद्यालय:, सी-ब्लॉक, दिलशाद गार्डन, देहली-95

**डॉ चेतन: वेदिया-** प्रशिक्षित-स्नातकशिक्षक:, (संस्कृतम्), राजकीय-प्रतिभाविकास-विद्यालय:, सिविल-लाइन्स, देहली

**डॉ. सारुल तिवारी-** प्रशिक्षित-स्नातक-शिक्षिका, (संस्कृतम्), सर्वोदय-कन्या-विद्यालय:, आनन्दविहार: देहली-92

**डॉ गजाननधरेन्द्र:-** प्रशिक्षित- स्नातक-शिक्षक:, (संस्कृतम्), सर्वोदय-बाल-विद्यालय: नं. 2 सी ब्लॉक, जनकपुरी, देहली-58

**श्री रामगोपाल-फगोडिया-** प्रशिक्षित-स्नातक-शिक्षक:,(संस्कृतम्), राजकीय-माध्यमिक-बाल-विद्यालय:नं. 2, खानपुरम्, देहली-80

**डॉ. श्रीराम: शर्मा-** प्रशिक्षित-स्नातक-शिक्षक:, (संस्कृतम्), राजकीय-सर्वोदय-बाल-विद्यालय: मटियाला, देहली

## प्रकाशनदलम्

**श्री दिनेश-कुमार-शर्मा,** ए.एस.ओ., राज्य-शैक्षिक अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

**सुश्री फौज़िया,** राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

# पाठानुक्रमणिका


| | | | पृष्ठाङ्काः |
|---|---|---|---|
| | आमुखम् | | vii |
| 1. | प्रथमः पाठः | वन्दे भारतमातरम् | 1 |
| 2. | द्वितीयः पाठः | नित्यं पिबामः सुभाषितरसम् | 9 |
| 3. | तृतीयः पाठः | मित्राय नमः | 13 |
| 4. | चतुर्थः पाठः | न लभ्यते चेत् आम्लं द्राक्षाफलम् | 19 |
| 5. | पञ्चमः पाठः | सेवा हि परमो धर्मः | 24 |
| 6. | षष्ठः पाठः | क्रीडाम वयं श्लोकान्त्याक्षरीम् | 29 |
| 7. | सप्तमः पाठः | ईशावास्यम् इदं सर्वम् | 34 |
| 8. | अष्टमः पाठः | हितं मनोहारि च दुर्लभं वचः | 41 |
| 9. | नवमः पाठः | अन्नाद् भवन्ति भूतानि | 46 |
| 10. | दशमः पाठः | दशमः कः? | 50 |
| 11. | एकादशः पाठः | द्वीपेषु रम्यः द्वीपोऽण्डमानः | 56 |
| 12. | द्वादशः पाठः | वीराङ्गना पन्नाधाया | 63 |

# आमुखम्

**शाश्वतस्य** प्राचीनस्य भारतीयज्ञानस्य वैचारिकसमृद्धपरम्परायाः चालोके एषा राष्ट्रियशिक्षानीतिः २०२० निर्मिता अस्ति । ज्ञानस्य, प्रज्ञायाः, सत्यस्य च अन्वेषणमिति सर्वदा भारतीयचिन्तनदर्शनयोः सर्वोच्चं मानवलक्ष्यं मन्यते। भारते संस्कृतेः ज्ञानस्य च समृद्धकोषोऽस्ति, यः सहस्रवर्षेषु समृद्धोऽभवत् । कोषोऽयं वर्तते संस्कृतभाषायाम्। उक्तमपि- **"संस्कृतिः संस्कृताश्रिता।"**

अतः यदि वयं भारतीयसंस्कृतेः संरक्षणं तस्याः भविष्ये च मार्गदर्शनमिच्छामश्चेत् संस्कृतस्य संवर्धनमत्यावश्यकम्। एतल्लक्ष्यमुद्दिश्य विद्यालयेषु संस्कृतभाषायां छात्राणां दक्षता अनिवार्या। दक्षतायै अभ्यासः अपेक्षितः। राष्ट्रियशिक्षानीतौ अधिगमस्य **'पञ्चपदी' प्रक्रिया** (Five Steps Learning Process)

**निर्दिष्टा-**

1. अदितिः(Introduction)
2. बोधः(Conceptual Understanding)
3. अभ्यासः(Practice)
4. प्रयोगः(Application)
5. प्रसारः(Expansion) च।

अधिगमप्रक्रियायां अदितिबोधौ प्रथमद्वयं तु कक्षाशिक्षकयोः सम्बद्धौ। परन्तु अभ्यासप्रयोगप्रसाराः मन्ये शिक्षार्थिनः आधिक्येन सम्बद्धाः। एतदेव मनसि निधाय शिक्षार्थिनां संस्कृतभाषायां दक्षतायै अभ्यासपुस्तिका एषा **'दीपिका'** सप्तमकक्षायै कल्प्यते। अभ्यासपुस्तिकायाम् (NCERT) राष्ट्रिय-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्-द्वारा निर्मितस्य पाठ्य-पुस्तकस्य **'दीपकम्'** इत्यस्याधारेण प्रत्येकं पाठस्य सामान्येन परिचयः, दक्षताऽऽधारितप्रश्नाः, गतिविधिः अन्ते च भारतीयज्ञानपरम्परा (IKS) इति प्रदता।

एवं **'दीपिका'** अभ्यासपुस्तिकायाः प्रत्येकं अभ्यासस्य चत्वारः भागाः सन्ति-

1. पाठस्य सामान्यपरिचयः
2. दक्षताऽऽधारितप्रश्नाः

3. गतिविधिः

4. भारतीयज्ञानपरम्परा (IKS) च।

अस्यामभ्यासपुस्तिकायां छात्राणामभ्यासाय षड्दक्षताः चिताः। एताः दक्षताः आश्रित्यैव अत्र प्रश्नाः निर्मितास्सन्ति। दक्षताधारितप्रश्नाः छात्रेषु भाषानैपुण्यं जनयन्ति, चिन्तनाय प्रेरयन्ति दैनिकजीवने च भाषाप्रयोगाय नियोजयन्ति।

**एताः सन्ति-** अभिज्ञानम्, व्याकरणप्रयोगः, साहचर्यम्, तार्किकचिन्तनम्, चयनम्, भाषाविस्तरश्चेति।

1. **अभिज्ञानम्-** अभिज्ञानदक्षतायाः आधारः स्मरणमेव। छात्रेण पूर्वं यत् पठितं ज्ञातं वा तत्सम्मुखे सति तस्य अवबोधः, ज्ञानं स्मरणं च अभिज्ञानमिति कथ्यते। अभिज्ञानदक्षतायुक्तः छात्रः नूतनज्ञानेन पूर्वज्ञानसम्बन्धं शीघ्रं स्थापयितुं शक्नोति । अयं गुणः अध्ययनस्य मूलाधारः।

2. **व्याकरणप्रयोगः-** भाषा व्याकरणमाश्रित्य एव प्रवर्तते। व्याकरणं विना शुद्धभाषणं शुद्धलेखनं वा अशक्यम्। उक्तमपि - **"मुखं व्याकरणं स्मृतम्।"** व्याकरणप्रयोगकुशलः अन्येषां विचारं सरलतया अवबोधयितुं समर्थः यथासमयं च भाषाप्रयोगार्हः।

3. **साहचर्यम्-** भाषायां साहचर्यपदेन ज्ञायते यत् छात्रः शब्दानां, धातूनां, प्रत्ययादिभाषिकतत्त्वादिनां सम्बन्धं स्थापयितुं समर्थः वा न। शिक्षार्थिनः यदा शब्दानां वाक्यानां च पारस्परिकं सम्बन्धं जानन्ति, तदा अर्थबोधः सुलभो भवति। भाषायाः शब्दार्थयोः, पदविन्यासस्य, प्रयोगभेदस्य च साहचर्यं विना शिक्षणं न सिध्यति।

4. **तार्किकचिन्तनम्-** भाषा केवलं संप्रेषणस्य साधनं न, अपि तु विचारप्रकाशनस्य उपकरणं च अस्ति। यदि छात्राः तार्किकतया चिन्तयितुं प्रशिक्ष्यन्ते, तर्हि ते स्ववाक्येषु युक्तिसङ्गतां संरचनां दातुं शक्नुवन्ति। एषा चिन्तनप्रक्रिया छात्राणां बुद्धेः विस्तारं करोति, विवेकं दृढं करोति, तर्काधारेण सत्यं मिथं च पृथक्कर्तुं शिक्षयति। तार्किकचिन्तनस्य प्रयोगे छात्रः प्रश्नानाम् उत्तरं केवलं स्मृत्या न ददाति, अपितु युक्त्या कारणैः सह प्रस्तौति। एतेन अभ्यासेन तेषां भाषाशक्तिः दृढा भवति, विचारप्रवाहः स्पष्टः भवति, आत्मविश्वासः च वर्धते।

5. **चयनम्-** भाषाशिक्षणे भिन्नप्रकृतिकपदानां समानार्थिपदानां वा चयनमपि एका प्रमुखा दक्षता। अत्र छात्राः बहुभ्यः पदेभ्यः पर्यायपदानि, विलोमपदानि वा चित्वा अभ्यासं स्वभाषाज्ञानं च सुदृढीकुर्वन्ति। योग्यचयनस्य साहाय्येन शिक्षार्थिनः भाषायाः सौन्दर्यं, प्रयोगशक्तिं च सहजतया अनुभवितुं शक्नुवन्ति।

6. **भाषाविस्तरः-** भाषाविस्तरः भाषाशिक्षणस्य परमं लक्ष्यं वर्तते। अत्र विद्यार्थिभिः पूर्वं पठितकार्यस्य अन्यासु परिस्थितिषु अन्येषु उदाहरणेषु वा प्रयोगः एव भाषाविस्तरः। भाषाशिक्षणं तदैव सम्पूर्णं मन्यते

यदा छात्राः पठितभाषायाः स्वतन्त्ररुपेण प्रयोगं कर्तुम् अर्हाः। शिक्षार्थिनः केवलं पाठ्यपुस्तकपर्यन्तं न तिष्ठेयुः, अपि तु व्यावहारिकजीवने अपि भाषायाः प्रयोगं कर्तुं समर्थाः भवेयुः। गृहकार्ये, खेलक्रीडायाम्, उत्सवेषु, लेखनादिविषयेषु भाषायाः प्रयोगः एव भाषाविस्तरः। तत्र नूतनाः विषयाः, आधुनिकप्रयुक्तयः, विज्ञानसम्बद्धाः शब्दाः च शिक्षणक्रमे सम्मिलनीयाः। भाषायाः प्रयोगः यदा नानाक्षेत्रेषु भवति, तदा शिक्षार्थिनां आत्मविश्वासः वर्धते।

भाषाशिक्षणे अन्याः बह्वयः दक्षताः अपि भवितुम् अर्हन्ति परं अत्र छात्राणां योग्यतासु अभिवृद्धिं कर्तुं, तेषाम् अभ्यासं सुदृढीकर्तुं तेषां च भाषाज्ञानं परिष्कर्तुम् अस्माभिः एताः दक्षताः चिताः। अत्र उद्देश्यमिदमेव वर्तते यत् छात्राः अत्रस्थानां दक्षतानाम् अभ्यासं कृत्वा प्रश्नोत्तरप्रदाने समर्थाः,शब्दप्रयोगे प्रवीणाः व्याकरणानुप्रयोगे दक्षाः, काव्यपाठे निपुणाः, सम्बन्धज्ञाने सिद्धाः शब्दचयने च चतुराः स्युः।

**"दीपिका"** नाम्नीयं संस्कृत-अभ्यासपुस्तिका छात्राणां भाषा-अधिगमे साधकत्वेन रचिता। अस्यां दत्ताः नैके अभ्यासप्रकाराः, अनेके प्रश्नाः, उदाहरणानि च छात्रेभ्यः संस्कृतभाषायाः सौन्दर्यं, व्याकरणस्य वैशद्यं, साहित्यस्य माधुर्यं च अनुभावितुं समर्थानि खलु । गतिविधिना क्रीडामाध्यमेन च भाषायां तेषां रुचिः अनायासेनैव भवेत्। **भारतीय-ज्ञान-परम्परा IKS** इत्यनेन समृद्धभारतीयवाङ्मये तेषां अवगाहनाय अन्वेषणाय च बुद्धिः जागृता स्यात्।

आशास्महे एषा **"दीपिका"** अभ्यासपुस्तिका विद्यार्थिनां संस्कृतशिक्षायाम् अभ्यासकारिणी, आत्मविश्वाससंवर्धिनी, मार्गदर्शिनी च सदा भविष्यति। सा तेषां शिक्षणपथि दीपशिखेव प्रकाशविस्तारिणी भूत्वा अध्ययनं श्रेयस्करं करिष्यति इति मे विश्वासः।

**डॉ० मनीषा तनेजा**

सहायक-आचार्या, (संस्कृतम्)

राज्य-शैक्षिक-अनुसंधानम् एवं प्रशिक्षण-परिषद्, दिल्ली

प्रथमः पाठः

# वन्दे भारतमातरम्

**पाठपरिचयः-** भारतमातुः बालसेवकाः! अस्माभिः प्रथमः पाठः 'वन्दे भारतमातरम्' पठितः। अस्मिन् पाठे वयं भारतदेशस्य विशेषताः ज्ञातवन्तः। भारते स्थितानां पर्वतानां नदीनां च नामभिः अस्माकं परिचयः अभवत् । पाठे वयं गौरवभूतस्य राष्ट्रध्वजस्य विशेषताः अपि पठितवन्तः। आगच्छन्तु, अधुना पाठाधृत्य दक्षताधारितप्रश्ननानाम् अपि अभ्यासं कुर्मः:-

**1. उदाहरणमनुसृत्य वचनपरिवर्तनं कृत्वा लिखन्तु । (भाषाविस्तरः)**

यथा- निर्झरः पर्वतात् पतति। निर्झराः पर्वतात् पतन्ति।

1. जनः ग्रामात् आगच्छति। ..............
2. कृषकः अन्नम् उत्पादयति। ..............
3. श्रमिकः कार्यं करोति। ..............
4. सैनिकः देशं रक्षति। ..............
5. ध्वजः अस्मान् प्रेरयति। ..............

**2. 'क' स्तम्भे ध्वजवर्णः लिखितः 'ख' स्तम्भे पुनः तस्य विशेषता लिखिता । तयोः समुचितं मेलनं कुर्वन्तु । (अभिज्ञानम्,साहचर्यम्)**

| 'क' स्तम्भः | | 'ख' स्तम्भः | |
|---|---|---|---|
| (क) | श्वेतः | (1) | ऐश्वर्यस्य परिचायकः |
| (ख) | हरितः | (2) | शौर्यस्य परिचायकः |
| (घ) | नीलः | (3) | शान्तेः परिचायकः |
| (ग) | केशरः। | (4) | सद्भावनायाः परिचायकः |

**3.** **पट्टिकायां विशेष्यपदानि प्रदतानि सन्ति। अधः प्रदत्तेभ्यः विशेषणपदैः तानि योजयित्वा लिखन्तु। (साहचर्यम्, चयनम्)**

1. पवित्राः .......................... 2. श्रेष्ठः ..........................
3. प्रेरकः .......................... 4. नीलवर्णम् ..........................
5. वत्सला ..........................

| पट्टिका | नद्यः, भारतमाता, चक्रम्, पर्वतः, ध्वजः |
|---|---|

**4.** **अधोप्रदत्तान् वाक्यांशान् पठित्वा सत्यम्/असत्यम् वा लिखन्तु । (अभिज्ञानम्,चयनम्)**

(1) हिमालयः भारतस्य दक्षिणदिशायाम् अस्ति। सत्यम्/असत्यम्

(2) गोदावरी भारतस्य दक्षिणदेशीया नदी अस्ति। सत्यम्/असत्यम्

(3) हरिद्वारं भारतस्य प्रसिद्ध तीर्थस्थलम् अस्ति। सत्यम्/असत्यम्

(4) त्रिवर्णध्वजे पञ्च वर्णाः सन्ति। सत्यम्/असत्यम्

(5) संस्कृतभाषायां विज्ञानं नास्ति । सत्यम्/असत्यम्

**5.** **उदाहरणानुसारं नगराणां विषये वाक्यद्वयं लिखन्तु । (भाषाविस्तरः)**

**यथा-** **'वाराणसी'**

1. अहं वाराणसी अस्मि ।
2. मम प्राचीनं नाम 'काशी' आसीत् ।

**नाम 'हरिद्वारम्**

1. .................................. 2. ..................................

**'देहली'**

1. .................................. 2. ..................................

'पटना'

1. ................................. 2. .................................

'उज्जैनः

1. ................................. 2. .................................

'विजयनगरम्',

1. ................................. 2. .................................

6. अधोलिखितानां नदीनां तटे स्थितानां नगराणां नामानि लिखन्तु । (चयनम् )

| नदी | नगरस्य नाम |
|---|---|
| गङ्गा | ................................. |
| यमुना | ................................. |
| गण्डक | ................................. |
| कोशी | ................................. |
| गोदावरी | ................................. |
| कृष्णा | ................................. |

7. प्रदत्तविकल्पेभ्यः समुचितं पदं चित्वा रिक्तस्थानं पूरयन्तु । (व्याकरणप्रयोगः)

(क) हिमालयः मुकुटरुपेण भारतमातुः ................................. शोभते।

(1) मस्तकम् (2) मस्तके (3) मस्तकाय (4) मस्तकात्

(ख) ............................ विराजमानाः वर्णाः विशिष्टं सन्देशं प्रयच्छन्ति ।

(1) ध्वजे (2) ध्वजः (3) ध्वजाय (4) ध्वजानाम्

(ग) वयम् अस्यां ................................. जन्म प्राप्तवन्तः

(1) भूमिः (2) भूम्यै (3) भूमिम् (4) भूम्याम्

(घ) अस्मिन् ........................................ चतुर्विंशतिः अराः सन्ति ।

(1) चक्रयोः (2) चक्रात् (3) चक्रे (4) चक्रेण

**8. अधः प्रदत्तसङ्केतवाक्यानि पठित्वा लिखन्तु अहं कः/का/ किम् ? (तार्किकता)**

- एषा भारतस्य राजधान्यां वहति।
- एतस्याः अपरं नाम कालिन्दी अस्ति ।
- अस्याः तटे भगवान् श्रीकृष्णः क्रीडति स्म ।

वदन्तु का अहम् ?..................



- अत्र प्रसिद्धं विश्वनाथमन्दिरम् अस्ति ।
- अत्र पवित्रतमा गङ्गा नदी प्रवहति ।
- अत्रत्याः शाटिकाः प्रसिद्धाः ।

वदन्तु किं नगरम् अहम् ? ..................



- अहं धरां शस्यश्यामलां करोमि ।
- अहं सर्वेषां भरण पोषणं च करोमि ।
- अहं हलधरः अस्मि ।



वदन्तु कः अहम् ?..................

**9. अधः प्रदतानि चित्राणि दृष्ट्वा पञ्चवाक्यानि रचयन्तु । (भाषाविस्तरः)**


**यथा -**



हिमालयः

1. अहं हिमालयपर्वतोऽस्मि ।
2. अहं भारतस्य उत्तरदिशायां स्थितोऽस्मि ।
3. अहं शत्रुभ्यः देशं रक्षामि ।
4. अहम् ओषधीः यच्छामि ।
5. अहं शुद्धं पवनं ददामि ।

1. ..................................
2. ..................................
3. ..................................
4. ..................................
5. ..................................



कृषकः

1. ..................................
2. ..................................
3. ..................................
4. ..................................
5. ..................................



गङ्गानदी

1. ..................................
2. ..................................
3. ..................................
4. ..................................
5. ..................................



सैनिकः

1. ..................................
2. ..................................
3. ..................................
4. ..................................
5. ..................................



वैज्ञानिकः

10. **उदाहरणम् अनुसृत्य शास्त्रेण सह ग्रन्थं योजयन्तु ।** (चयनम्)

**यथा-**

**चरकसंहिता चिकित्साशास्त्रेण सम्बद्धः ग्रंथः अस्ति ।**

1. चिकित्साशास्त्रम्- चरकसंहिता
2. खगोलविज्ञानम्- -----------------
3. विमानशास्त्रम्- -----------------
4. गणितक्षेत्रम्- -----------------

| पट्टिका | लीलावती, सूर्यसिद्धान्तम्, विमानशास्त्रम् |
|---|---|

---

## गतिविधिः

**I. नामस्मरणक्रीडा ।**

एकः छात्रः एकस्याः नद्याः नाम वदति। द्वितीयः छात्रः पुनः तेन नाम्ना सह एकस्याः नद्याः नाम योजयति। एवं प्रकारेण छात्राः क्रीडां कुर्वन्तु -

**यथा**

एकः-गङ्गा

द्वितीयः गङ्गा, यमुना

तृतीयः- गङ्गा, यमुना, सरस्वती

एवं क्रमेण क्रीडा प्रचलतु

II. पट्टिकातः पदानि चित्वा भारतस्य मानचित्रे समुचितस्थानेषु दर्शयन्तु ।

| पट्टिका | अरावलिपर्वतः, विन्ध्याचलः, हरिद्वारम्, अवन्तिका, विजयनगरम् |
|---|---|



## भारतीयज्ञानपरम्परा

| ग्रन्थकारः | ग्रन्थः |
|---|---|
| पाणिनिः | अष्टाध्यायी (व्याकरणम्) |
| आर्यभटः | आर्यभटीयम् (गणितं खगोलविज्ञानं च) |
| वराहमिहिरः | बृहत्संहिता (ज्योतिषं खगोलविज्ञानं प्राकृतिकविज्ञानं च) |
| ब्रह्मगुप्तः | ब्रह्मस्फुटसिद्धान्तम् (गणितं खगोलविज्ञानम्) |
| भास्कराचार्यः | सिद्धान्तशिरोमणिः (गणितं खगोलविज्ञानं च) |
| नागार्जुनः | रसरत्नाकरः (रसायनविज्ञानम्) |
| चरकः | चरकसंहिता (आयुर्वेदः) |
| सुश्रुतः | सुश्रुतसंहिता (शल्यचिकित्सा) |
| कणादः | वैशेषिकसूत्रम् (वैशेषिकदर्शनं परमाणुसिद्धान्तं च) |
| पतञ्जलिः | योगसूत्रम् (योगः) |

## द्वितीयः पाठः
# नित्यं पिबामः सुभाषितरसम्

**पाठपरिचयः-** भो रसप्रियाः प्रियच्छात्राः ! अस्मिन् पाठे वयं विभिन्नसुभाषितानां रसम् आस्वादितवन्तः। अत्र वयं न केवलं सुभाषितपदानाम् अर्थं ज्ञातवन्तः अपितु अनेकाभिः सूक्तिभिः स्वकीय-सामाजिक- नैतिकज्ञानेऽपि वृद्धिं कृतवन्तः । अत्र वयं पञ्चवकाराणां विषये, षड्दोषाणां विषये, छात्रगुणानां विषये,वाण्याः माधुर्यादिगुणानां विषये, परिश्रमस्य महत्त्वविषये पुण्यपापयोः च परिभाषाविषये पठितवन्तः। आगच्छन्तु अधुना वयं दक्षताधारितप्रश्नानाम् अभ्यासं कुर्मः।

1. **अधः प्रदत्तान् शब्दान् तेषां गुणैः सह योजयन्तु ।** **(साहचर्यम्)**

| स्तम्भः "क" | स्तम्भः "ख" |
|---|---|
| (क) वस्त्रम् | (1) व्यवहारः |
| (ख) वपुः | (2) आध्यात्मिकी |
| (ग) वाक् | (3) समुचितम् |
| (घ) विद्या | (4) स्वस्थः |
| (ङ) विनीतः | (5) मधुरा |

2. **अधः प्रदत्तान् वाक्यांशान् पठित्वा सत्यम् / असत्यं वा चिह्नितं कुर्वन्तु ।** **(अभिज्ञानम्)**

| | |
|---|---|
| (क) बुद्धिः सत्येन शुध्यति। | सत्यम्/ असत्यम् |
| (ख) षड्दोषाः पुरुषेण न हातव्याः। | सत्यम्/ असत्यम् |
| (ग) हिमाद्रेः दक्षिणे भारतम् अस्ति। | सत्यम्/ असत्यम् |
| (घ) प्रियवाक्यप्रदानेन सर्वे जन्तवः तुष्यन्ति। | सत्यम्/ असत्यम् |
| (ङ) परोपकारः पापाय भवति। | सत्यम्/ असत्यम् |

3. **पट्टिकाप्रदत्तशब्दैः रिक्तस्थानानि पूरयन्तु । (सम्बन्धः तार्किकचिन्तनं च)**

(क) बुद्ध्या ........ क्रियते।

(ख) भयेन ........ नश्यते।

(ग) लोचनेन ........ भवति।

(घ) आलस्येन ........ जायते।

(ङ) प्रियवचनैः जनाः ........ भवन्ति।

| पट्टिका | आत्मबलम्, दर्शनम्, तुष्टाः, समयनाशः, चिन्तनम् |
|---|---|

4. **पट्टिकातः शब्दान् चित्वा चित्रं दृष्ट्वा सज्जनस्य गुणान् दुर्जनस्य च दोषान् लिखन्तु । (चयनम्, तार्किकचिन्तनं च)**

| पट्टिका | आलस्यम्, भयम्, क्रोधः, परिश्रमः, दीर्घसूत्रता, परोपकारिता, सत्सङ्गतिः, अनुशासनम्, कालनाशः, विनयम् |
|---|---|





| | |
|---|---|
| 1. ................................. | 1. ................................. |
| 2. ................................. | 2. ................................. |
| 3. ................................. | 3. ................................. |
| 4. ................................. | 4. ................................. |
| 5. ................................. | 5. ................................. |

5. **अधःप्रदत्तानि रिक्तस्थानानि कोष्ठकप्रदत्तशब्दैः तृतीयाविभक्तिं योजयित्वा पूरयन्तु । (व्याकरणम्)**

**यथा- सर्वे जन्तवः <u>प्रियवाक्यप्रदानेन</u> तुष्यन्ति। (प्रियवाक्यप्रदान)**

(क) मालाकारः ................ मालां रचयति। (पुष्प)

(ख) स्वर्णकारः ................ आभूषणं करोति। (स्वर्ण)

(ग) लौहकारः ................ पात्रं निर्माति। (लौह)

(घ) कुम्भकारः ................ घटं करोति। (चक्र)

(ङ) रजकः ................ वस्त्रं प्रक्षालयति। (हस्त)

6. **अधोलिखितपदानां पर्यायपदानि पाठात् चित्वा लिखन्तु ।** **(चयनम्, भाषाविस्तर:)**

| शब्द: | | पर्यायपदम् |
|---|---|---|
| (क) | शरीराणि | ................. |
| (ख) | मति: | ................. |
| (ग) | सूर्यरश्मिभि: | ................. |
| (घ) | कमलसमूह: | ................. |
| (ङ) | प्राणिन: | ................. |

7. **अध:प्रदत्तानि वाक्यानि पठित्वा वदन्तु- क: / का अहम्?** **(तार्किकचिन्तनम्)**

(1)

(क) अहं सत्यवत्या: पुत्र: अस्मि।

(ख) अहम् अष्टादशपुराणानां रचयिता अस्मि।

(ग) अहं वेदानां विभागम् अपि कृतवान्।

**वदन्तु कोऽहम् ?**

(2)

(क) अहं पञ्च राजपुत्रान् पाठितवान्।

(ख) अहं पञ्चतन्त्रेषु निबद्धम् एकं नीतिग्रन्थं रचितवान्।

(ग) मया लिखिते तस्मिन् ग्रन्थे पशूनां पक्षीणां च कथा: सन्ति।

**वदन्तु कोऽहम् ?**

(3)

(क) अहं चन्द्रगुप्तस्य महामन्त्री गुरू: च अस्मि।

(ख) अहं नीतिशास्त्रस्य ज्ञाता अस्मि।

(ग) अहं तक्षशिलाविश्वविद्यालये अध्यापक: अस्मि।

**वदन्तु कोऽहम्?**

## गतिविधिः

### "सूक्तिलेखनम्"

**छात्राः** अध्यापकस्य सहायतया अधोलिखितं प्रतिविषयम् अधिकृत्य चार्टपत्रेषु पञ्च सूक्तयः लेखिष्यन्ति।

विद्या, विनयम्, परोपकारः, सत्सङ्गतिः, परिश्रमः।

## भारतीयज्ञानपरम्परा

| कथानीति- ग्रन्थः | लेखकः |
|---|---|
| (1) बृहत्कथा - | गुणाढ्यः |
| (2) बृहत्कथामञ्जरी - | क्षेमेन्द्रः |
| (3) कथासरित्सागरः- | पण्डितसोमदेवः |
| (4) पञ्चतन्त्रम् - | विष्णुशर्मा |
| (5) हितोपदेशः - | नारायणपण्डितः |
| (6) चाणक्यनीति - | चाणक्यः |

**अष्टादश पुराणानि-**

(1) (वैष्णवपुराणानि) सात्विकपुराणानि - विष्णु-नारदीय- भागवत- गरुड़-पद्म -वराहानि।

(2) (शैवपुराणानि) तामसपुराणानि- मत्स्य-कूर्म-लिंग- शिव-अग्नि-स्कन्दानि।

(3) (ब्राह्मपुराणानि) राजसपुराणानि - ब्रह्माण्ड- ब्रह्मवैवर्त- मार्कण्डेय-ब्रह्म-वामन- भविष्याणि।


## तृतीयः पाठः-

# मित्राय नमः



**पाठपरिचयः-** बालयोगिनः छात्राः ! 'मित्राय नमः' इति अस्मिन् पाठे वयं 'सूर्यनमस्कारः' इति आसनस्य विषये ज्ञातवन्तः। सूर्यनमस्कारस्य लाभान् मन्त्रं च पठितवन्तः। इदानीं वयं संस्कृतदक्षतायै प्रश्नानाम् अभ्यासं कुर्मः -

**1. सूर्यस्य कृते केषां पर्यायपदानां प्रयोगः पाठे कृतम् अस्ति। पट्टिकातः चित्वा लिखन्तु। (चयनम्)**



(1) .............. (2) .............. (3) .............. (4) .............. (5) ..............





(6) .............. (7) .............. (8) .............. (9) .............. (10) ..............



| पट्टिका | रविः, हिरण्यगर्भः, सविता, आदित्यः, भास्करः, नेत्रम्, मित्रः, अर्कः, रश्मिः, पूषा, खगः, मरीचिः, नक्षत्रम् |
|---|---|

2. कः / का कस्मै / कस्यै किं ददाति ? शुद्धक्रमानुसारं वाक्यानि रचयन्तु ।
(तार्किकचिन्तनम्, भाषाविस्तरः)

| कः / का | कस्मै / कस्यै | किं | ददाति | वाक्यम् |
|---|---|---|---|---|
| कृषकः | पाठकाय | औषधं | ददाति | 1. ............................................ । |
| शिक्षकः | रुग्णाय | पुस्तकं | ददाति | 2. ............................................ । |
| चिकित्सकः | छात्राय | काव्यं | ददाति | 3. ............................................ । |
| वैज्ञानिकः | देशाय | सस्यं | ददाति | 4. ............................................ । |
| कविः | अस्मभ्यं | आविष्कारं | ददाति | 5. ............................................ । |

3. चित्रं दृष्ट्वा अधस्थानाम् आसनानां नामानि लिखन्तु । (अभिज्ञानम्)

| | | | |
|---|---|---|---|
|  |  |  |  |
| (1) .......................... | (2) .......................... | (3) .......................... | (4) .......................... |

| | | | |
|---|---|---|---|
|  |  |  |  |
| (5) ............................ | (6) ............................ | (7) ............................ | (8) ............................ |

4. 'रुच्' धातोः प्रयोगे चतुर्थीविभक्तेः प्रयोगः भवति । चतुर्थीविभक्तेः प्रयोगं कृत्वा रिक्तस्थानं पूरयन्तु । (भाषा-विस्तरः)

**यथा -** बालिकायै श्रृंगारः रोचते। (बालिका)

(क) ................................ क्रीडनं रोचते । (क्रीडक)

(ख) ................................ मल्ले रोचते । (मल्ल)

(ग) ................................ चॉकलेहः रोचते । (बालक)

(घ) ................................ काव्यं रोचते। (लेखक)

(ङ) ................................ कूजनं रोचते । (कोकिला)

5. स्वास्थ्याय किं कर्तव्यम् ? किं न करणीयम् इति तालिकाद्वये लेखनीयम् । (तार्किकचिन्तनम्)

| (स्वास्थ्याय करणीयम्) | (स्वास्थ्याय न करणीयम् ) |
|---|---|
| 1. ......................... | 1. ......................... |
| 2. ......................... | 2. ......................... |
| 3. ......................... | 3. ......................... |
| 4. ......................... | 4. ......................... |

| पट्टिका | व्यायामम्, पिज़्ज़ा-आहारः, फलाहारः, आलस्यम्, ब्राह्ममूहूर्ते जागरणम्, विलम्बेन प्रातः जागरणम्, रात्रौ विलम्बेन शयनम्, रात्रौ समयेन शयनम् |
|---|---|

6. अधोलिखितपदानां चतुर्थविभक्तिरूपाणि लिखन्तु । (व्याकरणप्रयोग:)

| अकारान्तपुंल्लिङ्गः | आकारान्तस्त्रीलिङ्गः | अकारान्तनपुंसकलिङ्गः |
|---|---|---|
| यथा- सेवक- सेवकाय | अनुजा - अनुजायै | मित्र- मित्राय |
| देश - | पुत्री - पुत्र्यै | फल - |
| सैनिक - | छात्रा - | वन - |
| आदित्य - | कविता - | शरीर - |
| श्लोक - | देवी - | जल - |
| मन्त्र - | पितामही - | आसन - |
| छात्र - | आचार्या - | वाहन - |

7. संवादे पट्टिकाप्रदत्तपदैः रिक्तस्थानपूर्तिं कुर्वन्तु । (भाषाविस्तर:)

**छात्रा:-** ........................ (1). महोदयः!

**शिक्षक:-** सुप्रभातं ................... (2). अद्य वयं योगस्य विषये ....................... 3. ।

**छात्रा:-** श्रीमन् ! तर्हि वयं क्रीडाङ्गणं चलामः।

**शिक्षक:-** न! अद्य केवलं ........................ (4). कुर्मः। श्वः वयं योगस्य अभ्यासं करिष्यामः । किं भवन्तः जानन्ति किं नाम योगः ?

**एकः छात्र:-** महोदय ! 'योगः' मेलनम् इति भवति। यथा - एकं एकं ............... (5). 'द्वे' भवति ।





**शिक्षक:-** सत्यम्। परन्तु योगदर्शने महर्षिः ............... (6). कथयति - " **योगश्चित्तवृत्तिनिरोधः।"**

**छात्र:-** आचार्य! अस्य कः अर्थ?

**शिक्षक:-** 'चित्तवृत्तीनाम् निरोधः ...................... (7). कथ्यते ।

| पट्टिका | पठामः, मिलित्वा, पतञ्जलिः, योगः, चर्चां, प्रियच्छात्राः, सुप्रभातम् |
|---|---|

8. आसनानां नामानि आकृत्यनुसारं भवन्ति।' आसनस्य चित्रं दृष्ट्वा आसनस्य आकृतेः आसनस्य नाम च समक्षं लिखन्तु । (तार्किक-दक्षता)

| आसनस्य चित्रम् | आकृतेः नाम | आसनस्य नाम |
|---|---|---|
|  | मयूरस्य | मयूरासनम् |
|  | ................................ | ................................ |
|  | ................................ | ................................ |
|  | ................................ | ................................ |
|  | ................................ | ................................ |

## गतिविधिः


प्रियाः छात्राः! प्राणायामाय एकां क्रीडां क्रीडामः-

**क्रीडा-** **'एकश्वासेन संख्या-कथनम्'**

**निर्देशः-** यः/या एकश्वासेन अधिकाधिक-सङ्ख्यां कथयति सः/सा क्रीडां जेष्यति ।

## भारतीयज्ञानपरम्परा

**'योगसूत्रम्'** एकः दार्शनिकः ग्रन्थः अस्ति। यस्य प्रणेता महर्षिः पतञ्जलिः ।




### योगसूत्रे चत्वारः पादाः सन्ति-:


1. समाधिपादः
2. साधनपादः
3. विभूतिपादः
4. कैवल्यपादः

'योगसूत्रानुसारम्' अष्टाङ्गयोगः-

'यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधिः'

◆◆◆

## चतुर्थः पाठः
# (न लभ्यते चेत् आम्लं द्राक्षाफलम्)



**पाठपरिचयः-** वयं गीते कथां पठितवन्तः।एकः पिपासितः बुभुक्षितः च श्रृगालः वनं गच्छति । सः वने इतस्ततः भ्रमति तत्र किमपि न लभते । सः यदा श्रान्तः खिन्नः च भवति तदा लतानाम् उपरि द्राक्षाफलं पश्यति । वारं वारम् उत्पतति तथापि किमपि न लभते ।' आम्लं द्राक्षाफलम् 'इति कथयति पलायते च ।

### 1. अधोलिखितपदेषु रसं समुचितफलेन सह योजयन्तु । (साहचर्यम्)

| (क) | | (ख) | |
|---|---|---|---|
| (क) | कटुकम् | (1) | द्राक्षाफलम् |
| (ख) | कषायम् | (2) | आम्रम् |
| (ग) | आम्लम् | (3) | समुद्रजलम् |
| (घ) | तिक्तम् | (4) | निम्बफलम् |
| (ड.) | मधुरम् | (5) | मरीचिका |
| (च) | लवणम् | (6) | आम्लकम् |

2. **परिस्थित्यनुकूलं भावस्य अन्वेषणं कुर्वन्तु । (चयनम्)**

| पट्टिका | उष्णता, खिन्नता, बुभुक्षा, पिपासा, श्रान्ति: |
|---|---|

(i) जलं पातुं इच्छा ________________ भवति ।

(ii) क्षुधायाः अनुभूतिः ________________ भवति।

(iii) ग्रीष्मर्तौ ________________ अनूभूयते।

(iv) कार्यस्य आधिक्ये ________________ भवति।

(v) वारं वारम् असफलता प्राप्यते चेत् ________________ भवति।

3. **पट्टिकातः समुचितपदानि चित्वा रिक्तस्थानानि पूरयन्तु । (चयनम्)**

(क) वानरः ________ वृक्षे कूर्दति ।

(ख) गजः ________ राजमार्गे चलति ।

(ग) मूढमतिः ________ अभ्यासेन प्रवीणतां प्राप्नोति ।

(घ) कच्छपः ________ चलति ।

(ङ) द्राक्षाफलानि लताम् ________ दृश्यन्ते ।

| पट्टिका | उपरि-उपरि, मन्दै-मन्दम्, पुनः-पुनः, शनैः-शनै, वारम्-वारम् |
|---|---|

4. **समुचितमेलनं कुर्वन्तु । (सम्बन्धः)**

| | | | |
|---|---|---|---|
| (क) | पिपासा | (1) | शीतलः पवनः |
| (ख) | बुभुक्षा | (2) | जलम् |
| (ग) | श्रान्तः | (3) | भोजनम् |
| (घ) | खिन्नता | (4) | विश्रामः |
| (ड.) | उष्णता | (5) | प्रमोद : |

**5. उदाहरणानुसारं वाक्यानि पुनः लिखन्तु । (भाषाविस्तर:)**

| | |
|---|---|
| (क) व्याघ्रं दृष्ट्वा हरिण: कम्पते | (1) व्याघ्रं दृष्ट्वा हरिणाः कम्पन्ते । |
| (ख) अहं ईश्वरं वन्दे। | (2) ____________ |
| (ग) वयं राष्ट्रं सेवामहे। | (3) ____________ |
| (घ) आरक्षकं दृष्ट्वा चौरः पलायते। | (4) ____________ |
| (ङ) जनकं दृष्ट्वा पुत्रः प्रसन्नः भवति। | (5) ____________ |
| (च) स्वावलम्बिन: आत्मबलानि वर्धन्ते। | (6) ____________ |

**6. पट्टिकातः समुचितपदानि चित्वा कथां पूरयन्तु । (तार्किकचिन्तनम्)**


एकः (1) ____________ वनं गच्छति। सः (2) ____________ बुभुक्षितः च भवति । सः (3) ____________ इतस्ततः भ्रमति । सः दुःखितः श्रान्तः च भवति तस्य (4) ____________ अपि जायते । सः सर्वत्र पश्यति परं (5) ____________ न लभते। अन्ते सः लतासु एकां (6) ____________ पश्यति द्राक्षाफलं दृष्ट्वा सः तत्फलं ____________ इच्छति। तत्फलं लतायाः बहु उपरि भवति । द्राक्षाफलं प्राप्तुं सः वारं वारम् (7) ____________ । सः द्राक्षाफलं प्राप्तुम् (8) ____________ भवति । अतः 'द्राक्षाफलम् आम्लम्' इति (10) ____________ ततः पलायते।

| पट्टिका | पिपासितः, स्वेदः, वने, द्राक्षालताम्, भक्षयितुम्, कथयित्वा, असफलः, किमपि, उत्पतति, शृगालः |
|---|---|

**7. पुरुष-वचनानुगुणं कर्तृपदैः सह 'लभ्' धातोः आत्मनेपदि रूपाणि लट्लकाररूपाणि लिखत । (व्याकरणप्रयोग:)**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | सः .................. | तौ ........................ | ते .................. |
| मध्यमः | त्वम् .............. | युवाम् ................ | यूयम् ............. |
| उत्तमः | अहम् ................. | आवाम् ...................... | वयम् ............. |

8. **चित्रं दृष्ट्वा समुचितपदानि चित्वा रिक्तस्थानानि पूरयन्तु। (अभिज्ञानम्, तार्किकचिन्तनम्)**




(क) बालकस्य वामतः ____________________ अस्ति।

(ख) बालकस्य दक्षिणतः ____________________ अस्ति।

(ग) बालकस्य पृष्ठतः ____________________ अस्ति।

(घ) बालकस्य अग्रतः ____________________ पुस्तकम् अस्ति।

## गतिविधिः

(क). भो छात्राः, कक्षाकक्षे भवतः/ भवत्याः वामतः, दक्षिणतः , अग्रतः, पृष्ठतः, के/काः सन्ति ? क्रमशः सर्वे वदन्तु।

(ख) 'एकः श्रृगालः' इत्यस्य पाठस्य संस्कृतसप्ताहे वार्षिकोत्सवे प्रार्थनासभायां वा साभिनयं सामूहिकगानं कुर्वन्तु।

## भारतीयज्ञानपरम्परा

संस्कृतसाहित्ये नैकाः संस्कृतनीतिकथाः सन्ति। पशुपक्षिणां माध्यमेन जीवनोपयोगिनः नीतिपरककथाः प्रस्तुताः सन्ति । एताः कथाः लोके सुप्रसिद्धाः सन्ति । अत्र तासां परिचयः प्रदीयते-

| {नीतिकथा} | {रचनाकारः} |
|---|---|
| पञ्चतन्त्रम् | विष्णुशर्मा |
| हितोपदेशः | नारायणपण्डित : |
| कथासरित्सागरः | सोमदेवः |
| शुकसप्ततिः | चिन्तामणिभट्टः |
| वेतालपञ्चविंशतिका | वेताल भट्टरावः |
| सिंहासनद्वात्रिंशिका | क्षेमेन्द्रमुनिः |

पञ्चमः पाठः

# ॥ सेवा हि परमो धर्मः ॥

**पाठपरिचयः-** प्रियबालकाः ! "सेवा हि परमो धर्मः" इति पाठमाध्यमेन अस्माभिः पठितं यत् मानवीय सद्गुणेषु सेवाभावः अन्यतमः अस्ति। सेवाभावनायाः प्राधान्यत्वात् एव द्वितीयः युवकः सहायकत्वेन चितः । आगच्छत, सम्प्रति पाठाधृत्यदक्षताऽऽधारितप्रश्नानाम् अभ्यासं कुर्मः।


**1. "किं सेवाकार्यं कः करोति" मेलनं कुर्वन्तु । (चयनम्)**


| | |
|---|---|
| **चिकित्साम्** | आरक्षी |
| **कृषिम्** | शिक्षकः |
| **रक्षणम्** | पुरोहितः |
| **शिक्षणम्** | वैद्यः |
| **अर्चनम्** | कृषकः |

**2. शास्त्र-शास्त्रज्ञयोः मेलनं कुर्वन्तु । (सम्बन्धः, चयनम्)**

| | |
|---|---|
| **रसायनशास्त्रम्** | अक्षपादगौतमः |
| **खगोलशास्त्रम्प** | पाणिनी |
| **व्याकरणशास्त्रम्** | चाणक्यः |
| **न्यायशास्त्रम्** | आर्यभटः |
| **नीतिशास्त्रम्** | नागार्जुनः |

3. पट्टिकातः चित्वा मानवीय-गुणदोषयोः चयनं कृत्वा यथास्थानं लिखन्तु ।
(तार्किकचिन्तनम्, चयनम्)




| पट्टिका | परपीडनम्, हिंसनम्, सेवा, क्रोधः, सत्यम्, ईर्ष्या, करुणा, परोपकारः, मिथ्या, क्रूरता, उदारता, अक्रोधः |
|---|---|

4. ‘कस्य किं कार्यस्थलम्’ पट्टिकातः चित्वा लिखन्तु । (अन्वेषणम् ,अभिज्ञानम्)

| सेवाकारः | | स्थलम् |
|---|---|---|
| (I) | चिकित्सकः | ............................... |
| (ii) | शिक्षकः | ............................... |
| (iii) | वैज्ञानिकः | ............................... |
| (iv) | कर्मचारी | ............................... |
| (V) | विधायकः | ............................... |

| पट्टिका | पाठशाला | अनुसन्धानशाला | कार्यालयः | रुग्णालयः | विधानसभा |
|---|---|---|---|---|---|

5. चित्राणि दृष्ट्वा पट्टिकातः वस्तुसम्बन्धितं रसं चित्वा रिक्तस्थानानि पुरयन्तु । (चयनम्)

| पट्टिका | मधुरः, लवणः, कटुः, कषायः, तिक्तः, आम्लः |
|---|---|

| | | | |
|---|---|---|---|
|  | ..................... |  | ..................... |
|  | ..................... |  | ..................... |

| | | | |
|---|---|---|---|
|  | ..................... |   | ..................... |

**6.** **कथां विचार्य उत्तरन्तु ।** **(तार्किकचिन्तनम्)**

(i) ज्येष्ठजनानाम् आज्ञापालनमपि सेवायाः प्रकारः अस्ति- आम् / न

(ii) मतदानम् अपि सेवायाः कार्यम् अस्ति - आम् / न

(iii) पारितोषिकमिच्छन् कार्ये प्रवर्तनमपि सेवायाः कार्यम् अस्ति- आम् / न

(iv) यस्य कार्यस्य वेतनं मिलति तत् कार्यं सेवाकार्यम् न भवति - आम् / न

(v) आत्मचिन्तनं विहाय परस्य चिन्तनं सेवाकार्यम् अस्ति- आम् / न

**7.** **भारतीय-संस्कृतौ वर्णितैः अधोलिखितैः महापुरुषैः कृतं सेवाकार्यं पट्टिकातः चित्वा तेषां समक्षं लिखन्तु ।** **(अन्वेषणम् ,सम्बन्धः)**

**यथा - दिलीपः** **गो सेवा**

आरुणि : ..................................

श्रवणकुमारः ..................................

लक्ष्मणः ..................................

दधीचिः ..................................

शिविः ..................................

| पट्टिका | मानवतायाः सेवा, भ्रातृसेवा, मातृ-पितृ-सेवा, शरणागतसेवा, गुरुसेवा |
|---|---|

## गतिविधिः

### योगदानम्

अनाथालयं, रुग्णालयं, वृद्धाश्रमं च गत्वा तत्रत्यानां सेवाकार्याणां निरीक्षणं विधाय भवान् तत्र आत्मनः योगदानं कथं विधास्यति इति योजनां कृत्वा मित्रैः सह सेवाकार्याय एकस्याः कार्यतालिकायाः निर्माणङ्कुर्वन्तु।

## भारतीयज्ञानपरम्परा

**सेवायाः अर्थं महत्त्वं च प्रदर्शयन्तः केचन श्लोकाः –**

1. अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
   चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम् ।।
2. गुरोः शुश्रूषया विद्या पुष्कलेन धनेन वा ।
   अथवा विद्यया विद्या, चतुर्थो नोपलभ्यते ।।
3. यथा खनन् खनित्रेण नरो वार्यधिगच्छति ।
   तथा गुरुगतं विद्या शुश्रूषुरधिगच्छति ॥
4. यस्तु सञ्चरते देशान् यस्तु सेवेत् पण्डितान ।
   तस्य विस्तारिता बुद्धिः तैलबिन्दुरिवाम्भसि ॥
5. श्रेष्ठं जनं गुरुं चापि मातरं पितरं तथा ।
   मनसा कर्मणा वाचा सेवेत सततं सदा ॥
6. सेवितव्यो महावृक्षः फलच्छायासमन्वितः ।
   यदि दैवात् फलं नास्ति छाया केन निवार्यते ॥

◆◆◆

## षष्ठः पाठः
# क्रीडाम वयं श्लोकान्त्याक्षरीम्

**पाठपरिचयः-** प्रिय विद्यार्थिनः। वयं षष्ठपाठे विद्यायाः महत्वं विषये विभिन्नश्लोकान् पठितवन्तः। अस्मिन् पाठे वयं विद्यायाः महत्वं ज्ञातवन्तः। विद्यया वयं वृत्तिं, कीर्तिं, लक्ष्मीं, यशः, शीलं, सुखं धर्म-अर्थ-मोक्षान् च प्राप्नुमः। विद्यया जनः सर्वदा सर्वत्र च सम्मानं प्राप्नोति। आगच्छत, अधुना पाठाधृत्य दक्षताधारित-प्रश्नानाम् अभ्यासं कुर्मः -

**1. गुण-गुणिनोः मेलनं कुर्वन्तु । (साहचर्यम्)**

| | |
|---|---|
| यौवनम् | पुष्पम् |
| सुगन्धः | युवकः |
| विद्या | सुन्दरः |
| रूपम् | विद्वान् |

**2. अधोलिखितानां गुणानाम् / वस्तूनां कः सदुपयोगः? पट्टिकातः चित्वा लिखन्तु । (तार्किकचिन्तनम्,चयनम्)**

धनम् = .................................

विद्या = .................................

शक्तिः = .................................

| पट्टिका | मदाय, रक्षणाय, दानाय, परिपीडनाय, ज्ञानाय, विवादाय |
|---|---|

**3.** **पट्टिकायां प्रदत्तेभ्यः पदेभ्यः गुणान् दोषाञ्च पृथक्कृत्वा लिखन्तु।** **(तार्किकचिन्तनम्)**

| **स्वीकरणीयाः सद्गुणाः** | **त्याज्याः अवगुणाः** |
|---|---|
| i. .................... | I. .............. |
| ii. .................... | II. .............. |
| iii. .................... | III. .............. |
| iv. .................... | IV. .............. |

| **पट्टिका** | दानम्, तपः, विवादः, मदः, धर्मः, शीलम्, आलस्यम्, क्रोधः |
|---|---|

**4.** **यदा मनुष्यः विद्यां प्राप्नोति तदा विद्यया सह अन्यत् किं प्राप्नोति? लिखन्तु।** **(साहचर्यम्)**

i. ....................

ii. ....................

iii. ....................

iv. ....................

v. ....................


vi. ....................

vii. ....................

viii. ....................

| **पट्टिका** | यशस्विनीं वाणीम्, कलहम्, वृत्तिम्, कीर्तिम्, मदम्, निद्राम्, लक्ष्मीम्, शान्तिम्, मूर्खत्वम्, तत्वज्ञानम् |
|---|---|

5. विभिन्नपरिस्थितिषु विद्यायाः अस्माकं जीवने किं स्थानं भवति । (अभिज्ञानम्,चयनम्)




**पट्टिका** गुरुः, राजसभायाम्, बन्धुसमः, सम्पत्तौ

6. सत्यम् / असत्यं वा लेखनीयम् । (अभिज्ञानम्)

मनुष्यः गमनसमये सावधानं चलेत् । ☐

वस्त्रस्य सीवनं शीघ्रं कुर्यात् । ☐

पर्वतस्य उपरि आरोहणं क्रमेण कुर्यात् । ☐

धनस्य अर्जनं प्रयत्नेन च कुर्यात् । ☐

विद्या प्राप्तिः शीघ्रमेव भवति । ☐

7. **निम्नलिखितानां भूषणं किम् ? पट्टिकातः चिन्वन्तु । (साहचर्यम्)**

| | | |
|---|---|---|
| तारा | = | ............................... |
| लताः | = | ............................... |
| पृथिवी | = | ............................... |
| सर्वेषां जनानाम् | = | ............................... |

| **पट्टिका** | राजा, पुष्पम्, चन्द्रः, विद्या |
|---|---|

8. **निम्नलिखितैः विषयैः सह सम्बद्धानां विद्यानां नामानि मेलयन्तु । (साहचर्यम्)**

| **विषयाः** | **विद्याः** |
|---|---|
| रोगचिकित्सा | ज्योतिषशास्त्रम् |
| नक्षत्रग्रहाणाम् अध्ययनम् | आयुर्वेदः |
| युद्धे अस्त्र-शस्त्राणां प्रयोगः | वेदाः |
| मन्त्रयज्ञादि-प्रयोगाः | धनुर्वेदः |
| भवननिर्माणम् | वास्तुशास्त्रम् |

## गतिविधिः

**"स्फोरकपत्रनिर्माणम्"**

**विद्यायाः** महत्त्वविषयकाणां पञ्चश्लोकान् लिखित्वा स्फोरकपत्रमेकं निर्मान्तु।

## भारतीयज्ञानपरम्परा

भारते शास्त्रार्थपरम्परा अतीव प्राचीना महती च आसीत्। वैदिककाले एव गुरुकुलेषु, राजसभासु, आश्रमेषु च विदुषां मध्ये तर्क-वितर्क-प्रश्नोत्तररूपेण शास्त्रार्थाः प्रवर्तन्ते स्म। शास्त्रार्थः केवलं जयपराजयार्थं नासीत्, अपि तु तत्त्वज्ञानस्य परीक्षणाय, सत्यस्य अन्वेषणाय, बौद्धिकपरिष्काराय च साधनरूपेण प्रतिष्ठितः आसीत्। शास्त्रार्थे यो युक्त्या प्रमाणैः च स्वपक्षं स्थापयति स्म, स एव विद्वान् इति समाजेन मन्यते स्म। एषा परम्परा विदुषां विनयम्, धैर्यम्, तर्कशक्तिं च विकासयति स्म। एतस्मिन् सन्दर्भे गार्गी-याज्ञवल्क्ययोः शास्त्रार्थः विशेषतः सुप्रसिद्धः अस्ति। गार्गी ब्रह्मविद्यायां नारीणां प्रातिनिधित्वं कृत्वा निर्भयतया गम्भीरान् प्रश्नान् अपृच्छत्। याज्ञवल्क्यः अपि सूक्ष्मबुद्ध्या तत्त्वार्थं प्रतिपादयामास। तयोः संवादः न केवलं पाण्डित्यस्य प्रदर्शनम्, अपि तु भारतीयदर्शनस्य उच्चतमचिन्तनपरम्परायाः प्रतीकः एव।

◆◆◆

## सप्तमः पाठः
# ईशावास्यम् इदं सर्वम्

**पाठपरिचयः-** आत्मीयाः छात्राः! अस्मिन् पाठे वयं भक्तस्य प्रह्लादस्य कथां पठितवन्तः । प्रह्लादं मारयितुं हिरण्कशिपुः अनेकप्रयासान् अकरोत् । सः प्रह्लादं गजस्य सम्मुखं स्थापितवान् । होलिकया तम् अग्नौ ज्वालयितुं प्रयासाः अपि असफलाः अभवन् । अन्ते भगवान् नृसिंहः प्रकटीभूय हिरण्यकशिपुं मारितवान्। एवम् अहङ्कारोपरि भक्तेः विजयः जातः । आगच्छन्तु इदानीं वयं कैश्चन दक्षताप्रश्नैः पठितपाठस्य अभ्यासं कुर्मः ।

## 1. रिक्तस्थानेषु पट्टिकातः शब्दान् पूरयित्वा कथां पूरयन्तु । (अभिज्ञानम्)

प्रह्लादः महान् (i) .................... आसीत् । तस्य पिता (ii) .......................... 'अहम् ईश्वरः अस्मि' इति घोषितवान् । सः पुत्रं प्रह्लादं (iii) ...................... भक्तिं त्यक्तुम् आदिष्टवान् । किन्तु प्रह्लादः तस्य आदेशं न स्वीकृतवान् । क्रुद्धः हिरण्यकशिपुः प्रह्लादं मारयितुं तं (iv) .................. सम्मुखं स्थापितवान् । परन्तु भगवान् विष्णुः प्रह्लादं (v) ............................ । हिरण्यकशिपोः एका भगिनी आसीत् । तस्याः नाम (vi) ................... आसीत् । ब्रह्मणः वरस्य प्रभावेण सा अग्नौ न ज्वलति स्म। हिरण्यकशिपोः आज्ञया सा प्रहलादेन सह (vii) ......................... प्रविष्टवान् । किन्तु अग्निना होलिका एव दग्धा, प्रह्लादस्य किमपि नाभवत् । क्रुद्धः हिरण्यकशिपुः प्रह्लादं पृष्टवान् – "तव ईश्वरः कुत्र अस्ति ?" प्रह्लादः कथितवान् – "ईश्वरः तु सर्वत्र (viii) ................... अस्ति । (समीपस्थं स्तम्भं दर्शयन्) अस्मिन् स्तम्भे अपि अस्ति ।" हिरण्यकशिपुः क्रोधेन (ix) .............. भञ्जितवान् । स्तम्भात् भगवान् (x) ................... प्रकटितवान् हिरण्यकशिपुं च मारितवान् ।

| पट्टिका | रक्षितवान्, स्तम्भं, हिरण्यकशिपुः, अग्नौ, विष्णुभक्तः, नृसिंहः, विष्णोः, गजस्य, होलिका, व्याप्तः |
|---|---|

